# नमूने के प्रश्न–पत्र की योजना 2011 – 2012

कक्षा – x

विषय – संस्कृत (तृतीय भाषा) प्रश्न पत्र –

अवधि – 3 घण्टे 15 मिनट पूर्णांक – 80

1. उद्देश्य हेतु अंकभार –

| क्र.स. | उद्देश्य | अंकभार | प्रतिशत |
|---|---|---|---|
| 1. | ज्ञान | 19 | 23.75 |
| 2. | अवबोध अर्थग्रहण | 27 | 33.75 |
| 3. | ज्ञानोपयोग / अभिव्यक्ति | 24 | 30.00 |
| 4. | कौशल / मौलिकता | 10 | 12.50 |
| | | 80 | 100 |

2. प्रश्नों के प्रकारवार अंकभार –

| क्र. सं. | प्रश्नों का प्रकार | प्रश्नों की संख्या | अंक प्रति प्रश्न | कुल अंक | प्रतिशत | संभावित |
|---|---|---|---|---|---|---|
| 1. | वस्तुनिष्ठ / बहुविकल्पात्मक | - | - | - | - | - |
| 2. | अतिलघुत्तरात्मक | 2 | 1, 3 | 4 | 5.00 | 10 मिनट |
| 3. | लघुत्तरात्मक – I | 8 | 2,3,4 | 21 | 26.25 | 40 मिनट |
| 4. | लघुत्तरात्मक – II | 3 | 4 | 12 | 15.00 | 40 मिनट |
| 5. | निबंधात्मक | 9 | 4,8 | 43 | 53.75 | 80 मिनट |
| | योग | 22 | | 80 | 100 | 170 मिनट |

विकल्प योजना : आन्तरिक

पुनरावलोकन :– 10 मिनट

प्रश्न पत्र पठन हेतु :– 15 मिनट

3. विषय वस्तु का अंकभार –

| क्र.स. | विषय वस्तु | अंकभार | प्रतिशत |
|---|---|---|---|
| 1. | अपठित–अवबोधनम् कार्यम् एकः गद्याशः | 4 | 5 |
| 2. | अपठित–अवबोधनम् कार्यम् एकः सरलः गद्याशः | 8 | 10 |
| 3. | संकेताधारितम् पत्रम् | 4 | 5 |
| 4. | संकेताधारितम् संवाद लेखनम् | 4 | 5 |
| 5. | चित्राधारितं वर्णनम् / अनुच्छेद लेखनम् | 4 | 5 |
| 6. | श्लोकद्वयलेखनम् | 4 | 5 |
| 7. | सन्धिकार्यम् (व्याकरणम्) | 3 | 3.75 |
| 8. | समास | 3 | 3.75 |
| 9. | प्रत्ययाः | 4 | 5 |
| 10. | अव्ययानां प्रयोगः | 4 | 5 |
| 11. | वाच्य परिवर्तनम् | 4 | 5 |
| 12. | घटिका | 3 | 3.75 |
| 13. | संख्या–वाक्यप्रयोगः | 2 | 2.5 |
| 14. | वचन,लिंग, पुरुष लकार, संशोधनम् | 1 | 1.25 |
| 15. | पठित अवबोधनम् (एक गद्यांशः) | 5 | 6.25 |
| 16. | पठित अवबोधनम् (एक पद्यांशः) | 5 | 6.25 |
| 17. | पठित अवबोधनम् (एक नाट्यांशः) | 5 | 6.25 |
| 18. | भावबोधनम् (एकांश) | 2 | 2.5 |
| 19. | अन्वय पूर्ति | 2 | 2.5 |
| 20. | प्रश्ननिर्माणंत्रय | 3 | 3.75 |
| 21. | कथाक्रम संयोजनम् | 3 | 3.75 |
| 22. | संदर्भ शब्दानां प्रयोगः | 3 | 3.75 |
| | | 80 | 100 |

# प्रश्न–पत्र ब्ल्यू प्रिन्ट

कक्षा – X  विषय :– संस्कृत (तृतीय भाषा)  पूर्णांक 80

| क्र. सं. | उद्देश्य इकाई/उप इकाई | ज्ञान | | | | अवबोध | | | | ज्ञानोपयोगी/अभिव्यक्ति | | | | कौशल/मौलिकता | | | | योग |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | अति. लघु | लघु. | | निबं. | अति. लघु | लघु. | | निबं. | अति. लघु | लघु. | | निबं. | अति. लघु | लघु. | | निबं. | |
| | | | SA1 | SA2 | | | SA1 | SA2 | | | SA1 | SA2 | | | SA1 | SA2 | | |
| 1 | अपठित–अवबोधनम् कार्यम् एकः गद्याशः | | | | | | | | | | | | 4(1) | | | | | **4(1)** |
| 2 | अपठित–अवबोधनम् कार्यम् एकः सरलः गद्याशः | | | | | | | | 8(1) | | | | | | | | | **8(1)** |
| 3 | संकेताधारितम् पत्रम् | | | | | | | | 4(1) | | | | | | | | | **4(1)** |
| 4 | संकेताधारितम् संवाद लेखनम् | | | | | | | | 4(1) | | | | | | | | | **4(1)** |
| 5 | चित्राधारितं वर्णनम्/अनुच्छेद लेखनम् | | | | | | | | 4(1) | | | | | | | | | **4(1)** |
| 6 | श्लोकद्वयलेखनम् | | | | 4(1) | | | | | | | | | | | | | **4(1)** |
| 7 | सन्धिकार्यम् (व्याकरणम्) | | 3(1) | | | | | | | | | | | | | | | **3(1)** |
| 8 | समास | | 3(1) | | | | | | | | | | | | | | | **3(1)** |
| 9 | प्रत्ययाः | | | 4(1) | | | | | | | | | | | | | | **4(1)** |
| 10 | अव्ययानां प्रयोगः | | | 4(1) | | | | | | | | | | | | | | **4(1)** |
| 11 | वाच्य परिवर्तनम् | | | | | | | | | | | | | | | **4(1)** | | **4(1)** |
| 12 | घटिका | | | | | 3(1) | | | | | | | | | | | | **3(1)** |
| 13 | संख्या–वाक्यप्रयोगः | | | | | | | | | | **2(1)** | | | | | | | **2(1)** |
| 14 | वचन,लिंग,पुरुष लकार, संशोधनम् | 1(1) | | | | | | | | | | | | | | | | **1(1)** |
| 15 | पठित अवबोधनम् (एक गद्यांशः) | | | | | | | | | | | | 5(1) | | | | | **5(1)** |
| 16 | पठित अवबोधनम् (एक पद्यांशः) | | | | | | | | | | | | 5(1) | | | | | **5(1)** |
| 17 | पठित अवबोधनम् (एक नाट्यांशः) | | | | | | | | | | | | 5(1) | | | | | **5(1)** |
| 18 | भावबोधनम् (एकांश) | | | | | | 2(1) | | | | | | | | | | | **2(1)** |
| 19 | अन्वय पूर्ति | | | | | | 2(1) | | | | | | | | | | | 2(1) |
| 20 | प्रश्ननिर्माणंत्रय | | | | | | | | | | 3(1) | | | | | | | 3(1) |
| 21 | कथाक्रम संयोजनम् | | | | | | | | | | | | | | 3(1) | | | 3(1) |
| 22 | संदर्भ शब्दानां प्रयोगः | | | | | | | | | | | | | | 3(1) | | | 3(1) |
| | योग | 1(1) | **6(2)** | 8(2) | **4(1)** | **3(1)** | 4(2) | | 20(4) | | **5(2)** | | **19(4)** | | **6(2)** | 4(1) | | **80(22)** |
| | कुल योग | **19(6)** | | | | 27(7) | | | | **24(6)** | | | | **10(3)** | | | | **80(22)** |

विकल्पों की योजना :– प्रश्न संख्या 3 व 5 आन्तरिक विकल्प है।  नोटः– कोष्ठक में बाहर की संख्या अंकों की तथा भीतर प्रश्नों की द्योतक है।

हस्ताक्षर

# माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर

## नमूने का प्रश्न–पत्र

**कक्षा–10**

**विषय– संस्कृतम् (तृतीयभाषा)**

अनुक्रमांक □□□□□□

अवधिः 3:15 होराः — अधिकतमांकाः–80

सामान्यनिर्देशाः

(i) सर्वे प्रश्नाः अनिवार्याः।

(ii) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

(iii) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः।

(iv) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः।

**प्रश्न 1. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत– 4**

राष्ट्रस्य अभ्युदयाय महिलाशिक्षायाः महती आवश्यकता अनुभूयते।
शिक्षया जनेषु आत्मविश्वासः समुत्पन्नो भवति। आत्मविश्वासेन सफलता मिलति।
समाजे महिला क्षमतायाः प्रतिभायाः च प्रतिमूर्तिरूपा किन्तु व्यावहारिक–जीवने महिलानाम् अधिकाराः पुरुषवर्गस्य समं न सन्ति। सामान्यतः पुरुषो धनार्जनं कृत्वा परिवारस्य संरक्षणं करोति। शिक्षिताः महिलाः धनम् अर्जयित्वा आय–व्यवस्थाम् अपि कुर्वन्ति।

**(क) एकपदेन उत्तरत–** ½+½=1

(i) कीदृश्यः नार्यः आय–व्ययस्य व्यवस्थामपि कुर्वन्ति?

(ii) कया जनेषु आत्मविश्वासः भवति?

**(ख) पूर्ण वाक्येन उत्तरत–** 1

(i) देशस्य उन्नत्यै कस्य अत्यधिकं आवश्यकता वर्तते?

**(ग) निर्देशानुसारम् उत्तरत–** ½+½+½+½=2

(i) 'कुर्वन्ति' इति पदस्य कर्ता लेखनीयः।

(ii) 'सन्ति' इति पदं लङ् लकारे (भूतकाले) परिवर्त्य लिखत।

(iii) 'क्षमतायाः प्रतिभायाः च' इत्यस्य समासं कृत्वा लिखत।

(iv) 'कुटुम्बस्य' इत्यस्य पर्यायवाचिशब्दं अनुछेदात् चित्वा लिखत।

**प्रश्न 2. अधोलिखितं गद्यांशं प्रपठ्य एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिख्यन्ताम् – 8**

स्वेच्छया भ्राम्यन्, नीलीभाण्डे पतितः कश्चित्शृगालः स्वशरीरस्य नीलवर्णं दृष्ट्वा अन्यान् शृगालान् आहूय वदति – "अहं वनदेव्या वनराज्ये अभिषिक्तः अतः परं वने मम आज्ञया व्यवहारः करणीयः"। अन्ये शृगालाः तं विशिष्टवर्णं दृष्टवा प्रणम्य वदन्ति – "यथा आज्ञापयति देवः।" स्वज्ञातिभिः आवृतः सः सर्वं साधितवान्। अनन्तरं व्याघ्रसिंहादीन् उत्तमपरिजनान् प्राप्य सः अन्यान् शृगालान् दूरं कृतवान्। अपमानिताः ते तस्य मारणोपायम् अचिन्तयन्। एकदा यदा सः शृगालः व्याघ्रादिभिः परिवृतः राज्यसभायाम् उपविष्टः आसीत् तदा सर्वे शृगालाः अपि तत्र आगताः। सर्वे मिलित्वा महाशब्दं कृतवन्तः। ततः तं शब्दं श्रुत्वा जातिस्वभावात् सः अपि शब्दं कृतवान्। तस्य शब्दं श्रुत्वा व्याघ्रादयः तस्य वास्तिविकं स्वरूपं ज्ञातवन्तः। संक्रुध्य तं मारितवन्तः।

**(क) एकपदेन उत्तरत –** ½+½+½+½=**2**

(i) व्याघ्रादयः संक्रुध्य कं मारितवन्तः?

(ii) शृगालः वनराज्ये कया अभिषिक्तः ?
(iii) दूरीकृताः शृगालाः तस्य सम्बन्धे किं व्यचारयन्?
(iv) कैः आवृतः शृगालः सर्वं साधितवान्?

(ख) **पूर्णवाक्येन उत्तरत –** 1+1+1=**3**
(i) सर्वे शृगालाः महाशब्दं कदा कृतवन्तः?
(ii) अन्ये शृगालाः कदा दूरीकृताः?
(iii) शृगालस्य शब्दं श्रुत्वा व्याघ्रादयः किं ज्ञातवन्तः?

(ग) अस्य अनुछेदस्य उपयुक्तं शीर्षकं लिखत। 1

(घ) यथानिर्देशं प्रश्नान् उत्तरत– ½+½+½+½=2
(i) (आकर्ण्य) इत्यस्य पर्यायवाचिशब्दं अनुछेदात् चित्वा लिखत।
(ii) 'अपमानिताः ते तस्य मरणोपायम् अचिन्तयन्' अस्मिन् वाक्ये विशेषण पदं किम् ?लिख्यताम्।
(iii) "अहं वनदेव्या वनराज्ये अभिषिक्तः" अत्र 'अहं' सर्वनामपदस्थाने संज्ञापदं लिखत।
(iv) 'स्वज्ञातिभिः आवृतः सः सर्वं साधितवान्' अत्र कर्ता कः?

**प्रश्न 3.** भवती राजकीय–उच्च–माध्यमिक–विद्यालय–रामनगरम् इत्यस्य दशमकक्षायाः नन्दिनी नामकछात्रा अस्ति। भवत्याः सखीं प्रतिभां एकं पत्रं लिख यत्, यस्मिन् "मम विद्यालयः मह्यम् अत्यधिकं रोचते" इति वर्णनं स्यात्। 4

**अथवा**

भवान् राजवीरः। भवतः विद्यालये वार्षिकोत्सवे संस्कृत नाटकस्य मञ्चनम् भविष्यति। तदर्थं स्व मित्रम् राजपालं प्रति लिखितं निमन्त्रणपत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।

| **मञ्जूषा–** द्रष्टुम्, अग्रजेभ्यः, रूपनगरतः, कुशली, मञ्चनम्, राजपाल! करिष्यामि, उत्साहवर्धनम्। |
|---|

किशान छात्रावास
. ............।
तिथिः 10/10/2011

प्रिय मित्र........
अत्र सर्वगतं कुशलम् अस्ति। मन्ये भवान् अपि........ इति। अस्माकं विद्यालयस्य वार्षिकोत्सवे, "रमणीया हि सृष्टिः एषा" इति नाटकस्य....... भविष्यति। अहं तस्मिन् नाटके काकस्य अभिनयं....... । भवान् अवश्यमेव तत्.... आगच्छतु। मम अपि...... भविष्यति। सर्वेभ्यः....... मम प्रणामाञ्जलिः निवेद्यताम् इति।

भवतः मित्रम्
राजवीरः

**प्रश्न 4 मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं "मातापुत्रयोः संवादं" पूरयत।** 4

| **मञ्जूषा–** धनं, शर्करां, विना, पीत्वा, अम्ब, द्विदलं च, करोषि, दुग्धं, प्रक्षालयामि, आनयामि |
|---|

माता– कनक! किं......त्वम्।
कनकः– पाठं पठामि..... !
माता– दुग्धं पीतवान्?
कनकः–...... नैव पीतम्।
माता– तर्हि दुग्धं...... आपणं गच्छसि किम्।
कनकः– अम्ब! किम्......ततः।

माता – वत्स! आपणं गत्वा लवणं,..... तण्डुलान्, गुडं,..... आनय।
कनकः– तर्हि शीघ्रं.... स्यूतं च ददातु अम्ब!

**प्रश्न 5** अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया **"काकस्य चातुर्यम्"** इति कथाम् 4 लिखत।

| |
|---|
| **मञ्जूषा** – एकः काकः, पिपासितः, घटे, न्यूनं जलं, प्रस्तर–खण्डान्, उपरि आगच्छति, पिपासा शान्ता। |



अथवा

अधोलिखिताम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायाम् लिखत।

| |
|---|
| **मञ्जूषा**– भूटानः, वर्षपर्यन्तं, भारतमातुः, प्रान्तानि, राजस्थानम्, उत्तरदिशायां, रक्षति, कथ्यते, उत्तराञ्चलः, प्रतिवेशिनौ। |

हिमालयः अस्माकं..... गर्वोन्नतं मस्तकमिव शोभते। अयम् अस्माकं देशस्य...... स्थितोऽस्ति। अत्र........ हिमं भवति। अतः अयम् हिमालयः..... । हिमालयस्य क्रोडे कश्मीरः, हिमाचलप्रदेशः,...... मेघालयः, मणिपुरः, असमः आदयः भारतस्य.... सन्ति। नेपालः........ च........ देशौ स्तः।

**प्रश्न 6 द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम्। 4**

**प्रश्न 7 अधोलिखित पदेषुसन्धिविच्छेदं सन्धिं वा कृत्वा सन्धिनामपि लिखत उत्तर पुस्तिकायां लिखत– 1+1+1=3**

(क) द्वयोः + अपि =
(ख) तस्य + उपचारे =
(ग) मां भृशम् =.... +....

**प्रश्न 8 अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहं अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत– 1+1+1=3**

(क) तया <u>वृद्धदासी</u> आलोकिता।
(ख) <u>हयाश्च नागाश्च</u> वहन्ति बोधिताः।
(ग) सः <u>चक्रेण सह</u> गच्छति।

**प्रश्न 9 कोष्ठकेषु प्रदतैः शब्दैः प्रकृति प्रत्ययानुसारं रिक्तस्थानपूर्तिः करणीया– 1+1+1+1=4**

(क) तनयः तत्र........अध्ययने संलग्नः समभूत। (वस्+शतृ)
(ख) आदिश्यतां किं....... । (कृ+अनीयर्)
(ग).........! स्वागतं ते। (श्रेष्ठ+इनि)
(घ) व्याघ्रं दृष्ट्वा सा...... । (चिन्तितवत्+ङीप्)

**प्रश्न 10 मञ्जूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत– 1+1+1+1=4**

| |
|---|
| मञ्जूषा –अपि, पुरा, विना, बहिः, कुत्र, वृथा, शनैः |

भानुप्रिया – त्वम् अधुना. ....... गच्छसि?
भानुप्रतापः– अहं ग्रामाद्........ भ्रमणाय गच्छामि।
भानुप्रिया – अहम्..... त्वया सह गन्तुमिच्छामि।
भानुप्रतापः– अहं तु त्वया...... एव गमिष्यामि।

**प्रश्न 11 अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तर–पुस्तिकायां लिखत –** **1+1+1+1=4**

**(क)** सः पुस्तकानि पठति।

**(ख)** प्रियंका लेखं लिखति।

**(ग)** त्वया गम्यते।

**(घ)** अस्माभिः कार्यं क्रियते।

**प्रश्न 12 घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्।** **1+1+1=3**

(क) (ख) (ग)







**(क)** जननी.....वादने आपणं गच्छति
**(ख)** बालकाः.... वादने गृहं गच्छन्ति।
**(ग)** विद्यार्थिनः.... वादने. विद्यालयं गच्छन्ति।

**प्रश्न 13 अधोलिखितसंख्यायाः स्वरचितवाक्ये प्रयोगः करणीये–** 1+1=2

**(क)** चतस्रः
**(ख)** ६0 (60) इति संख्यां संस्कृतभाषया शब्देषु लिखत।

**प्रश्न 14 अधोलिखितवाक्ये शुद्धे कृत्वा पुनः लेखनीये–** $^1/_2+^1/_2=1$

(क) भवान् कुत्र गच्छसि?
(ख) बलवीरः मम मित्रः अस्ति।

**प्रश्न 15 अधोलिखित गद्यांशं पठित्वा प्रश्नान् उत्तरत–** **5**

अथ सा कन्या धात्रीमुखेनातिथिं स्नानाय प्रेरितवती। स्नानशुद्धायातिथये तैलमामलकं चायच्छत्। फलकमारुह्य प्रांगणकदलीदलं लवित्वा तत्रासनं भोजनाधारं च कृतवती। पेयोपहारपूर्वं भोजनं घृतसहितौदनं व्यंजनं च तस्मै दत्तवती। मध्ये मध्ये च विविधभोज्यादि प्रकारान् वर्णयित्वा रुचिमपि वर्धितवती। अन्ततः शिशिरवारिणा पेयमाचमनं च प्रदत्तवती। भुक्ते तु तस्मिन् तयास्य शयनव्यवस्थापि कृता। एवं कन्यागुणसम्पदा समाकृष्टः शक्तिकुमारस्तां विधिवदुपयम्य नीतवान्।

**(क) एक पदेन उत्तरत–** ½+½=1

(i) कया आकर्षितः शक्तिकुमारः कन्यया सह विवाहं कृतवान्?

(ii) सा कन्या धात्रीमुखेन स्नानाय कं प्रेरितवती?

**(ख) पूर्ण वाक्येन उत्तरत** 1

शक्तिकुमारे भोजनं कृतवति कन्यया किं कृतम्?

**(ग)** "नीतवान्" इति कृदन्त पदस्थाने क्रियापदं लिख्यताम्। 1

**(घ)** "तस्मै" इत्यस्य स्थाने संज्ञापदं लिख्यताम्। 1

**(ङ)** "शीतलजलेन" इत्यस्य पर्यायवाचिशब्दं लिखत। 1

**प्रश्न 16 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत–** **5**

हसति हसति स्वामिन्युच्चै रुदत्यपि रोदिति
कृतापरिकरः स्वेदोद्‌गारं प्रधावति धावति।
गुणसमुदितं दोषोपेतं प्रनिन्दति निन्दति
धनलवपरिक्रीतो भृत्यः प्रनृत्यति नृत्यति।।

**(क)** कीदृशो भृत्यः स्वामिनि हसति हसति?(एक पदेन उत्तरत) 1

**(ख)** भृव्यः कां कां प्रतिक्रियां प्रकटीकरोति? (पूर्ण वाक्येन उत्तरत) 1

**(ग)** रुदत्यपि रोदिति इत्येतयोः क्रियां चित्वा लिख्यताम्। 1

**(घ)** "स्वामी" इत्यस्य विलोम शब्दं पद्यांशात् चित्वा लिखत। 1

**(ङ)** "कृतपरिकरः स्वेदोद्‌गारं प्रधावति धावति" अत्र विशेषण पदं चित्वा लिखत 1

**प्रश्न 17 अधोलिखितं नाट्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–** **5**

व्याघ्रः– गच्छ, गच्छ जम्बुक! त्वमपि किंचिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

शृगालः– व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः– प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

जम्बुकः– स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः– शृगाल! यदि त्वम् मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

**(क)** एक पदेन उत्तरत। ½

(i) व्याघ्रो जम्बुकं कुत्र गन्तुं निर्दिष्टवान्? ½

(ii) शृगालानुसारं व्याध्रः कस्माद् विभेति?

(ख) व्याघ्रः किं कुर्वन्तीं व्याघ्रमारीम् अपश्यत्?(पूर्ण वाक्येन उत्तरत) 1

(ग) "कलहायमानौ" इति विशेषणस्य विशेष्यं चित्वा लिखत। 1

(घ) "गच्छ, गच्छ जम्बुक!" अत्र कर्ता प्रच्छन्नः। विचार्य लिखत। 1

(ङ) यदि त्वं मां मुक्त्वा यासि।"त्वम्" इत्यस्य स्थाने संज्ञापदं लिखत। 1

**प्रश्न 18 "आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः" इत्यस्य भावबोधनं सरलसंस्कृत भाषया लिखत। 2**

**प्रश्न 19** एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्।।

**उपर्युक्त श्लोकस्यान्वयमाश्रित्य रिक्तस्थानानि पूरयत–** **2**

एक एव(i)———————(ii)—————————(iii)————————— वने वसति। वा(iv)—————म्रियते पुरन्दरं याचते वा।

**प्रश्न 20 दत्तोत्तराण्यधिकृत्य प्रश्ननिमार्णं करणीयम्–** 1+1+1=3

**(क)** प्रश्नः– कीदृशं....................... ?

उत्तरम् – शरीरायासजननं कर्म व्यायामसंज्ञितम्।

**(ख)** कस्मात् कारणात्....................?

राजा जिज्ञासायाः समाधानाय मुनेः पार्श्वमुपागच्छत्

**(ग)** कीदृशं.............?

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।

**प्रश्न 21–अधोलिखितानि वाक्यानि क्रमरहितानि। यथाक्रमं संयोजनं कृत्वा लिखत।** ½x6 = **3**

(i) अन्येद्युः तौ न्यायालये स्व स्व पक्षं पुनः स्थापितवन्तौ।

( ii ) किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्।

( iii ) अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।

( iv ) न्यायधीशो बंकिमचन्द्रः उभाभ्यां पृथक्–पृथक् विवरणं श्रुतवान्।

( v ) ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्।

( vi ) सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्।

**प्रश्न 22 ''क'' स्तम्भे पदानि दत्तानि। "ख" स्तम्भे क्रमरहिताः तेषां व्याख्या समानार्थक शब्दा वा दत्ताः। उचित मेलनं कृत्वा लिखत।** ½x6 = **3**

| | क | ख |
|---|---|---|
| (i) | लता | तिलस्य विकारः |
| ( ii ) | कलरवम् | कुन्दमाला रचयिता |
| ( iii ) | तैलम् | पुष्प – फलदायिनी, आश्रयापेक्षिणी वनस्पतिः |
| ( iv ) | दिङ्नागः | मधुरवाणी |
| ( v ) | भृशम् | उत्खनात् प्राप्तं द्रव्यम् |
| ( vi ) | खनिजम् | अत्यधिकम्। |

**कक्षा 10**
**संस्कृत**
**अपेक्षितोत्तराणि**

कोष्ठकेषु पाठ्यपुस्तक पृष्ठांकाः दत्ता :।

**प्रश्न 1**

(क) (i) शिक्षिताः (ii) शिक्षया ½+½=1

(ख) देशस्य उन्नत्यै महिला शिक्षायाः अत्यधिकम् आवश्यकता वर्तते। 1

(ग) (i) (शिक्षिताः) महिलाः ½
(ii) आसन् ½
(iii) क्षमताप्रतिभयोः ½
(iv) परिवारस्य ½

**प्रश्न 2** (क) (i) शृगालम् ½
(ii) वनदेव्या ½
(iii) मारणोपायम् ½
(iv) स्वज्ञातिभिः ½

(ख) (i) यदा सः शृगालः व्याघ्रदिभिः परिवृतः राज्य सभायाम् उपविष्टः आसीत् तथा यदा सर्वे शृगालाः अपि तत्र आगताः। 1
(ii) व्याघ्रसिंहादि उत्तमपरिजन प्राप्त्यनन्तरम्। 1
(iii) तस्य वास्तविकस्वरूपम्। 1

(ग) स्वभावो दुरतिक्रमः। 1

(घ) (i) श्रुत्वा ½
(ii) अपमानिताः ½
(iii) शृगालः ½
(iv) सः (शृगालः) ½

**प्रश्न 3** संकेताधारितं पत्रम् 4

**प्रश्न 4** करोषि, अम्ब, दुग्धं, पीत्वा, आनयामि, शर्करां, द्विदलं च, धनम् ½x8=4

**प्रश्न 5** भारतमातुः, उत्तरदिशायां वर्षपर्यन्तं कथ्यते, उत्तरांचलः, प्रान्तानि, भूटानः, प्रतिवेशिनौ ½x8=4

प्रश्न 6 पाठ्यपुस्तकात् दौ श्लोको लेखनीयौ 2+2=4

**प्रश्न 7** (क) द्वयोरपि, रुत्व, विसर्ग सन्धि (पृष्ठ–22) 1+1+1=3
(ख) तस्योपचारे, गुण, स्वर सन्धि (पृष्ठ–68)
(ग) माम् भृशम्, अनुस्वार, व्यंजन सन्धि

**प्रश्न 8** (क) वृद्धा दासी (वृद्धा च असौ दासी), कर्मधारय (पृष्ठ–13) 1+1+1=3
(ख) हयनागाः, द्वन्द्व समास (पृष्ठ–49)
(ग) सचक्रम्, अव्ययीभाव (पृष्ठ–9)

**प्रश्न 9** (क) वसन् (पृष्ठ–90) 1+1+1+1=4
(ख) करणीयम् (पृष्ठ–91)
(ग) श्रेष्ठिन् (पृष्ठ–73)
(घ) चिन्तितवती (पृष्ठ–40)

**प्रश्न 10** कुत्र, बहिः, अपि, विना 1+1+1+1=4

| | | |
|---|---|---|
| प्रश्न 11 | (क) तेन पुस्तकानि पठ्यन्ते। | 1+1+1+1=4 |
| | (ख) प्रियंकया लेखः लिख्यते। | |
| | (ग) त्वं गच्छसि। | |
| | (घ) वयं कार्यं कुर्मः। | |
| प्रश्न 12 | (क) सपाद सप्त – वादनम् | 1+1+1=3 |
| | (ख) त्रि – वादनम् | |
| | (ग) सार्धाष्ट – वादनम् | |
| प्रश्न 13 | (क) चतस्रः बालिकाः (कोऽपि स्त्रीलिंग शब्दः) गच्छन्ति। | 1+1=2 |
| | (ख) षष्टिः | |
| प्रश्न 14 | (क) भवान् कुत्र गच्छति ? (त्वं कुत्र गच्छसि) | ½+½=1 |
| | (ख) बलवीरः मम मित्रम् अस्ति। | |
| प्रश्न 15 | (क) (i) कन्यागुण सम्पदा (पृष्ठ–14) | 1+1+1+1+1=5 |
| | (ii) अतिथिं शक्तिकुमारम् वा | |
| | (ख) शक्तिकुमारे भोजनं कृतवति कन्यया तस्य शयन व्यवस्था कृता। | |
| | (ग) अनयत् | |
| | (घ) शक्तिकुमाराय | |
| | (ड.) शिशिरवारिणा | |
| प्रश्न 16 | (क) धनलवपरिक्रीतः। (पृष्ठ–100) | 1+1+1+1+1=5 |
| | (ख) सः हसति, रोदति, प्रधावति, निन्दति नृत्यति च। | |
| | (ग) रोदिति | |
| | (घ) भृत्यः | |
| | (ड.) कृतपरिकरः | |
| प्रश्न 17 | (क) (i) गूढप्रदेशम् (पृष्ठ–40) | 1+1+1+1+1=5 |
| | (ii) मानुषात् (व्याघ्रमारीतः) | |
| | (ख) सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्तीम्। | |
| | (ग) पुत्रौ (घ) त्वम् (ड.) शृगाल | |
| प्रश्न 18 | (पृष्ठ सं. 48) | 2 |
| प्रश्न 19 | (i) मानी (ii) खगः (iii) चातकः (iv) पिपासितः (पृष्ठ सं. 85) | 2 |
| प्रश्न 20 | (क) कीदृशं कर्म व्यायामसंज्ञितम् ? (पृष्ठ सं. 31) | 1+1+1=3 |
| | (ख) कस्मात् कारणात् राजा मुनेः पार्श्वमुपागच्छत ? (पृष्ठ सं. 64) | |
| | (ग) कीदृशं धूमं मुञ्चति शतशकटीयानम् ? (पृष्ठ सं. 4) | |
| प्रश्न 21 | उचितोत्तरस्य क्रमः – (iii), (iv), (vi), (ii), (v), (i) (पृष्ठ सं. 91) | ½x6=3 |
| प्रश्न 22 | (i) लता = पुष्पफलदायिनी, आश्रयापेक्षिणी वनस्पतिः (पृष्ठ सं. 4) | ½x6=3 |
| | (ii) कलरवम् = मधुर वाणी (पृष्ठ सं. 4) | |
| | (iii) तैलम् = तिलस्य विकारः (पृष्ठ सं. 14) | |
| | (iv) दिड्.नागः = कुन्दमाला रचयिता (पृष्ठ सं. 21) | |
| | (v) भृशम् = अत्यधिकम् (पृष्ठ सं. 66) | |
| | (vi) खनिजम् = उत्खनात् प्राप्तं द्रव्यम् (पृष्ठ सं. 58) | |